## भावे । (१८/३१८४)

[1]भावे वाच्ये धातोः घञ् प्रत्ययो भवति । पाकः । त्यागः । [2]रागः । क्रियासामान्यवाची भवतिः । तेन अर्थनिर्देशः क्रियमाणः [3]सर्वधातुविषयः कृतो भवति । धात्वर्थश्च [4]धातुनैवोच्यते । यस्तस्य सिद्धता नाम धर्मः तत्र घञादयः प्रत्ययाः विधीयन्ते । पुंलिङ्गैकवचनं चात्र न तन्त्रं, लिङ्गान्तरे वचनान्तरेऽपि[5] चात्र प्रत्यया भवन्त्येव । पक्तिः, पचनम्, पाकौ, पाकाः [6]इति ॥

## अकर्तरि च कारके सञ्ज्ञायाम् । (१९/३१८८)

कर्तृवर्जिते[7] कारके सञ्ज्ञायां विषये [8]धातोः घञ् भवति । प्रास्यन्ति तं प्रासः । प्रसीव्यन्ति [9]तं प्रसेवः । आहरन्ति तस्माद् रसम् इति आहारः । मधुराहारः । [10]तक्षशिलाहारः । [11]अकर्तरि इति किम् ? मिषत्यसौ मेषः[12] । सञ्ज्ञायाम् इति किम् ? कर्तव्यः कटः । [13]सञ्ज्ञाव्यभिचारार्थश्चकारः । को भवता दायो [14]दत्तः । को भवता लाभो लब्धः । कारकग्रहणं [15]पर्युदासे न कर्तव्यम् । तत् क्रियते प्रसज्यप्रतिषेधेऽपि समासोऽस्ति इति ज्ञापनार्थम्, 'आदेच उपदेशेऽशिति' (६.१.४५/२३७०) इति । इत उत्तरं भावे, अकर्तरि च कारके इति [16]द्वयमनुवर्तते ॥

## परिमाणाख्यायां सर्वेभ्यः । (२०/३१९०)

परिमाणाख्यायां गम्यमानायां सर्वेभ्यो धातुभ्यः घञ् प्रत्ययो भवति । एकस्तण्डुल[17]निश्चायः । द्वौ शूर्पनिष्पावौ (म.भा. २.१४६) । '[18]कॄ विक्षेपे' (धा. पा. १४१०)—द्वौ कारौ । त्रयः काराः । सर्वग्रहणमपोऽपि बाधनार्थम् । पुरस्ताद[19]पवादन्यायेन (व्या.प. ९) ह्यचमेव[20] बाधेत, [21]नापम् । परिमाणाख्यायाम् इति किम् ? निश्चयः । आख्याग्रहणं रूढिनिरासार्थम् । तेन सङ्ख्याऽपि गृह्यते, [22]न प्रस्थाद्येव । घञनुक्रमणमजपोर्विषये, स्त्रीप्रत्ययास्तु न बाध्यन्ते । एका [23]तिलोच्छित्तिः । द्वे [24]प्रसृती (म.भा. २.१४५) ।

[२९८] दारजारौ कर्तरि णिलुक् च । (म. भा. २.१४७)

दारयन्ति इति दाराः । [25]जरयन्ति इति जाराः ॥

## इङश्च । (२१/३१९१)

इङो धातोः घञ् प्रत्ययो भवति । अचोऽपवादः । [26]अध्यायः । [27]उपेत्यास्मादधीते[28] उपाध्यायः ।

---

1. भावे वचनान्तरे च क. 2. रोगः ब. ग. 3. सर्वधात्वर्थविषयः क. 4. धातुना उच्यते क. 5. अपि च नास्ति अ. फ, अपि नास्ति ब. ह. 6. इति नास्ति क. 7. अन्यस्मिन् इत्यधिकम् अ. ह. 8. धातोः नास्ति फ, घञ् प्रत्ययः अ. फ. 9. तमिति अ. फ. ह. 10. नास्ति ह. 11. कर्तरि फ. 12. बिभर्त्यसौ भर्ता इत्यधिकम् क. 13. संज्ञायां फ. 14. दत्तः नास्ति फ. 15. पर्युदासपक्षे अ. 16. द्वयमपि अ. क. फ. ह. 17. निचायः अ. ब. क. 18. कॄ विक्षेपे नास्ति ह. 19. अपवादविधिन्यायेन ब. 20. एव नास्ति फ, बाधते ड. 21. नापम् नास्ति ब. ह. 22. न प्रस्थाद्येव नास्ति ब. ड. 23. तिलोच्छ्रितिः ब. ड, तिलोच्छित्ती क. फ. 24. प्रश्रुती ड. 25. जरयति इति जारः ब. 26. प्रोध्यायः ह. 27. वाक्यमिदं नास्ति ह. 28. अधीते नास्ति अ. ब. क. ड.